श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगोदोपमाष्टकम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीगोदोपमाष्टकम् ॥

सन्मानसाब्ज प्रवणां सारासारविवेकिनीम्।
सद्गतिं शुद्धरूपां त्वां गोदे! हंसीं प्रचक्षते॥ १ ॥

तेजोमयस्वरूपत्वात् श्रीमत्सेवित वैभवात्।
चिन्तामणिसमागोदे! देशिकैः त्वमिहोच्यसे॥ २ ॥

अनेकशाखोज्ज्वलित स्वरूपात्
 अनन्तभोगिप्रिय वर्धकत्वात्।
सुरेशभूषासुमनः प्रदानात्
 सुरद्रुमेणासि समाद्य गोदे॥ ३ ॥

सद्गोविलासेन तमोहरत्वात्
 समस्तसद्वन्दित मण्डलत्वात्।
पद्मानौज्ज्वल्यकर प्रभावात्
 भासीह गोदे रवितुल्य शीला॥ ४ ॥

कलानिधित्वात् कमलात्मकत्वात्
 भवार्ति ताप क्षपणस्वशैत्यात्।
सदा महाविष्णुपदानुषङ्गात्
 हिमांशुतुल्य त्वमिहासि गोदे॥ ५ ॥

श्यामां द्विजाधिपसुतां श्रवणाभिरामां
 मञ्जुस्वनां मदनमीश्वरजं भजन्तीम्।
गोदे गुरोस्त्रिजगतां गुणशालिनीं त्वां
 लीलाशुकीं कृतधियः समुदाहरन्ति॥ ६ ॥

वृषप्रियां विश्वजनाखिलार्थ
 विश्राणनोत्कां विधिवासवेड्याम्।

www.prapatti.com

श्रुतिप्रसन्नां सुरभिं विशङ्के
स्वस्थां मखार्हां भवतीं तु गोदे॥ ७ ॥

गोदे स्नातासि मातस्त्वमिह निगमशास्त्रोक्त मन्त्रक्रियाभ्यां
एतेनैवातिपापा वयमपि सकला मुक्तपापा भवामः।
लोके दृष्टञ्च कर्मेदृशमिह सकलैः स्वप्रजारोग शान्त्यै
माता पीत्वा कषायं तनयमथ निजस्तन्य दानेन पाति ॥ ८ ॥

॥ इति श्रीगोदोपमाष्टकं संपूर्णं ॥

www.prapatti.com